# Guhyeshvari Stotram

# गुह्येश्वरीस्तोत्रम्

## Document Information

Text title : Guhyeshvari Stotram

File name : guhyeshvarIstotram.itx

Category : devii, devI, buddha, stotra

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# गुह्येश्वरीस्तोत्रम्

भगवति बहुरूपे निर्विकारे निरञ्जे
निमितनिखिलरूपे निश्चयातीतरूपे ।
अखिलनिगमपारे नित्यनित्यस्वभावे
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ १॥

हसितमुखशशाङ्कं ज्योत्स्नया रात्रिभूतं
दशशतकिरणोद्यद्वक्त्रमाध्यन्दिनं ते ।
अरुणवदनशोभा औदयी चास्तकाले
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ २॥

गलजठरपदेषु स्वर्गमर्त्याहिलोकाः
सकलभगणदन्ता रोमराजी द्रुमास्ते ।
गिरय इव नितम्बा रक्तशुक्लाः समुद्राश्
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ ३॥

पवनदहनवेगाः श्वासप्रश्वास एव
प्रलयप्रभवकालो मीलनोन्मीलनाभ्याम् ।
द्विदशतपनभूता भीमवक्त्रास्त्वदीयाश्
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ ४॥

अनुपमतनुदेहं व्याप्यमानं समन्तान्
निखिलनिगमसारं दर्शयन् देवि दिव्यम् ।
त्रिभुवनमखिलं ते दर्शितुमेति बुद्धिश्
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ ५॥

विधिमुखविबुधास्ते किङ्कराः पादसंस्था
मुकुटविधृतबुद्धे सर्वमार्गा हि शुद्धे ।
किमु तव महिमानं वर्णये गुह्यदेवि
चरणकमलयुग्मं नौमि देवि त्वदीयम् ॥ ६॥

अनुपठति समाप्तौ पूजने भक्तिमान् यो
नुतिमति वितगोति स्पष्टमेवास्य बुद्धिः ।
सकलजनजनन्या भक्तिसम्पत्तिमुच्चैः
करतलवशगास्ताः सिद्धिपुष्ट्यौ लभन्ते ॥ ७॥

इति श्री स्वयम्भूपुराणोद्धृतं मञ्जुनाथकृतं
गुह्येश्वरीस्तोत्रं सम्पूर्णम् ॥

*Guhyeshvari Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*